## ICSE 2023 EXAMINATION
## SPECIMEN QUESTION PAPER
## SANSKRIT
## (SECOND LANGUAGE)

***Maximum Marks : 80***
***Time allowed : Three hours***
***Answers to this Paper must be written on the paper provided separately.***
*You will **not** be allowed to write during the first 15 minutes.*
*This time is to be spent in reading the question paper.*
***The time given at the head of this Paper is the time allowed for writing the answers.***

*This paper comprises of **two** Sections; **Section** A and **Section B.***
*Attempt **all** the questions from **Section A**.*
*Attempt any **four** questions from **Section B**, answer in at least **one** question each from the **two** books you have studied and **any two** other questions.*
*The intended marks for questions or parts of questions are given in brackets [ ].*

### SECTION—A (40 Marks)

*Attempt **all** questions.*

**Question 1**

Write a small composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— **[15]**

अधोलिखितेषु विषयेषु **एकं** विषयं आधृत्य **150-200** शब्दपरिमितं निबन्धं **संस्कृतभाषया** लिखत :—

**(i)** 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इत्युक्तिं मनसि निधाय जन्मभूमे: विषये निबन्धमेकं लिखत।

**(ii)** समूहमाध्यमा: (social media) समाजेषु जागृतिम् उत्पादयन्ति इति कथयित्वा समूहमाध्यमानां परिचयात्मकं निबन्धं लिखत।

**(iii)** योगाभ्यासेन मानसिकं, दैहिकं च आरोग्यरक्षणं भवति इति विषये निबन्धं लिखत।

**(iv)** ज्ञानसम्पादनस्य सुलभं मार्गं पुस्तकानां पठनम् अस्ति। अत: भवत: प्रियपुस्तकस्य विषये लिखत।


*© Copyright reserved.*

(v) चित्रस्याधारेण निबन्धं लिखत :—



**Question 2**

Write a letter in **Sanskrit** on any **one** of the following topics :— [7]

अधोलिखितयोः विषययोः **एकं** विषयं आधृत्य पत्रमेकं **संस्कृतभाषया** लिखत :—

**(i)** विरामसमये कथं त्वं तव समयस्य सदुपयोगं कृतवान्/कृतवती इति मित्रं प्रति पत्रं लिखत।

**(ii)** भवान्/भवती उन्नताध्ययनं कर्तुम् इच्छन्ति। अतः अध्ययनप्रमाणपत्रार्थं तव विद्यालस्य प्राचार्यं प्रति पत्रं लिखतु।

**Question 3**

Read the following passage given below and answer in **Sanskrit** the questions that follow, using your own words as far as possible :—

दत्तम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि यथासंभवं स्ववाक्यैः **संस्कृतभाषया** देयानि :—

विक्रमसिंहनामकः महाराजः आसीत्। एकदा अन्यप्रदेशं गन्तुं महारजः अश्वम् आरुह्य सैनिकैः सह प्रस्थितवान्। बहुदूरप्रयाणात् सर्वे अश्वाः पिपासया श्रान्ताः अभवन्। महाराजः चरणार्थमपि अश्वान् न

त्यक्तवान् आसीत्। मार्गे किञ्चित् दूरे एक: कृषक: स्थितवान् आसीत्। महाराज: — 'तम् आनयत अत्र' इति आज्ञापितवान्। कृषक: भीत्या एव सैनिकै: सह महाराजस्य समीपं गतवान्।

महाराज: कृषकम् उक्तवान् — "एते अश्वा: तृणेन विना जलेन विना श्रान्ता: सन्ति। बुभुक्षया, पिपासया च शक्तिहीना: सन्ति। चरणार्थं योग्यं क्षेत्रं कुत्र अस्ति ? इति वद" इति।

कृषक: चिन्तितवान् — "एते अश्वा: यत्र चरणं कुर्वन्ति तस्य क्षेत्रस्य नाश: तु अवश्यं भविष्यति। अन्यस्य क्षेत्रं दर्शयामि तदीयं क्षेत्रं विनष्टं भविष्यति। तस्य पापकृत्यस्य फलं मया एव प्राप्तव्यम्। अत: मम एव क्षेत्रं दर्शयामि" इति।

अत: स: — "आगच्छतु महाराज ! क्षेत्रं दर्शयामि" इति उक्त्वा अग्रे गतवान्। सैनिका: महाराज: च अश्वै: सह कृषकम् अनुसृतवन्त:। मार्गे बहूनि समृद्धानि क्षेत्राणि दृष्टानि। किन्तु कृषक: अग्रे अग्रे गतवान्। अन्ततो गत्वा स: सर्वान् स्वक्षेत्रम् आनीतवान्। किन्तु तत्र चरणार्थं समृद्धानि तृणानि न आसन्।

एतत् दृष्ट्वा महाराज: कोपेन — "अये मूर्ख ! एतै: दुर्बलै: तृणै मम अश्वानाम् उदरं पूर्णं न भवति। समृद्धेन तृणेन विना ते कथं चरन्ति ? अस्मान् किमर्थम् एतादृशं क्षेत्रम् आनीतवान् भवान् ?" इति पृष्टवान्।

तदा कृषक: उक्तवान् — "महाराज ! एतत् मम क्षेत्रम्। अत्र तृणसमृद्धि: नास्ति चेदपि सामान्यतृणानि तु सन्ति एव। चिन्तया विना भवान् अत्र अश्वान् चरणार्थं त्यजतु। अन्येषां क्षेत्रं नष्टं मा भवतु इति अहं मम क्षेत्रं प्रति अश्वान् आनीतवान्। अन्येषां हानि: न भवेत् इति दृष्ट्या, मानवीयतया च अहम् एवं कृतवान्" इति।

तदा राजा स्वस्य अविवेकं ज्ञातवान्। 'अहं चिन्तनेन विना अहङ्कारेण व्यवहृतवान्' इति चिन्तयन् स: खेदेन कृषकम् उक्तवान् — सहोदर ! अज्ञानेन अहम् अन्ध: आसम्। भवान् स्वस्य मानवीयतादृष्ट्या, परोपकारबुध्या च मम अन्धताम् अपनीतवान्। तदर्थम् अहं कृतज्ञ: अस्मि। इत: परं कदापि स्वार्थभावनया न व्यवहरामि। अन्यान् न पीडयिष्यामि" इति।

**(i)** महाराज: कृषकं किम् उक्तवान्। **[2]**

**(ii)** कृषक: मनसि किं चिन्तितवान् ? **[2]**

**(iii)** महाराज: कोपेन कृषकं किम् उक्तवान् ? **[2]**

**(iv)** महाराज: खेदेन कृषकं किम् उक्तवान् ? **[2]**

**(v)** कृषक: स्वस्य क्षेत्रस्य विषये महाराजं किम् उक्तवान् ? **[2]**

**Question 4**

Answer the following according to the instructions given :—

अधो लिखितान् प्रश्नान् यथा निर्देशम् उत्तरयत :—

**(i)** अत्र एतत् शुद्धं वाक्यम्। **[1]**

**(a)** गुरुकुलं निकषा नदी प्रवहति

**(b)** गुरुकुलेन निकषा नदी प्रवहति

**(c)** गुरुकुलस्य निकषा नदी प्रवहति

**(d)** गुरुकुलाय निकषा नदी प्रवहति

**(ii)** परोपकार: इत्यस्य विग्रहवाक्यम् एवं भवति। **[1]**

**(a)** पर: उपकार: **(b)** परेषाम् उपकार:

**(c)** परेषु उपकार: **(d)** परं उपकार:

**(iii)** मया धर्म: रक्ष्यते। अस्य वाच्यपरिवर्तनम् एवं भवति। **[1]**

**(a)** अहं धर्मं रक्षामि **(b)** अहं धर्मं रक्ष्यते

**(c)** अहं धर्मं रक्षिष्यामि **(d)** मया धर्मं रक्षामि

**(iv)** ''प्रणम्य'' इत्यस्य प्रकृतिप्रत्ययविभजनम् एवं भवति। **[1]**

**(a)** प्र + नम् + ल्यप **(b)** प्र + नम् + क्तवतु

**(c)** प्र + नम् + शानच् **(d)** प्र + नम् + तुमुन्

**(v)** ''महदिदम्'' अस्य सन्धिविच्छेदम् एवं भवति। **[1]**

**(a)** महदि + दम् **(b)** महत् + इदम्

**(c)** महा + इदम् **(d)** महद् + इदम्

**(vi)** एतानि तालव्याक्षराणि भवन्ति। **[1]**

**(a)** क ख ग **(b)** प फ ब

**(c)** ट ठ ड **(d)** श च छ

(vii) माहेश्वरसूत्राणि एतवन्तः सन्ति ? [1]

(a) एकादश (b) नवदश

(c) चतुर्दश (d) पञ्चदश

(viii) 'बालिकाः गीतं गायान्ति।' — अस्य लृट् लकारेण परिवर्तनम् एवं भवति। [1]

(a) बालिकाः गीतं गास्यति (b) बालिकाः गीतं गायिष्यति

(c) बालिकाः गीतं गीयन्ते (d) बालिकाः गीतं गास्यन्ति

## SECTION—B (40 Marks)

*Attempt any **four** questions from **Section B**, answering at least **one** question each from the **two** books you have studied and any **two** other questions.*

## संस्कृतवाणी भाग-4

### महाकविः कालिदासः

**Question 5**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधो लिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

यद्यपि कालिदासः प्रख्यातः। तथापि तस्य देशकालादीनां विषये किञ्चिदपि न ज्ञायते। इदम् अस्माकं दौर्भाग्यम्।

(i) कालिदासस्य देशकालादीनां विषये लिखत। [2]

(ii) विक्रमनृपस्य आस्थानस्य नवरत्नानां नामानि लिखत। [2]

(iii) कालिदासेन रचितानि काव्यानि कानि कानि ? [3]

(iv) अनामिका किमर्थं सार्थवती बभूव ? [3]

### छात्रशिक्षणम्

**Question 6**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधो लिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

भो: छात्रा: अस्मात् क्षणात् वयं निर्दोषवन्त: प्रिया: छात्रा: भवेम इति सङ्कल्पं कुरुथ। स्वकार्याणि सम्यक् रीत्या आनन्दोत्साहेन कृत्वा मातापितृन् गुरुजनान् तोषयथ। यदा भवन्त: स्वदोषान् पर्यालोच्य तान् परिहर्तुं प्रयत्नं करिष्यन्ति तदा सदाचारिण: संस्कारवन्त: भविष्यन्ति।

(i) सद्विद्या का ? [2]

(ii) छात्रेभ्य: का वर्जनीया ? सा किं करोति ? [2]

(iii) छात्रा: संस्कारवन्त: भवितुं किं करणीयम् ? [3]

(iv) सम्यक् शिक्षणं किं जनयति ? शिक्षणस्य प्रमुख: उद्देश: क: ? [3]

### अमृतधारा

**Question 7**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधो लिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

सुष्टु भाषितं सुभाषितम् इत्यर्थ:। संस्कृतवाङ्मये सुप्रसिद्धानि सुभाषितानि सन्ति। अमरुक-भर्तृहरिप्रभृतिभि: साहित्यकारै: एतदर्थं शतकसाहित्यमेव विरचितम्। तेषां कृतिषु रम्याणि सुभाषितानि लभ्यन्ते। तानि अस्मान् व्यवहारचातुर्यं बोधयन्ति। तत्त्वं च उपदिशन्ति।

(i) कुलीन: कान् गुणान् न त्यजति ? [2]

(ii) पुरुष: कथं परीक्ष्यते ? [2]

(iii) धीरा: कथं भवन्ति ? विशदयत। [3]

(iv) सत्सङ्गति: पुंसां किं करोति। [3]

## संस्कृतवाणी भाग-5

### प्रार्थना

**Question 8**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् श्लोकं पठित्वा तस्याधो लिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

माता पिता गुरु: चैव स्वभावात् त्रितयं हितम्।
गृहीत्वा वचनं तेषां, सुखी भवति मानव:।

(i) अञ्जनानन्दन: क: ? स: किं किं कृतवान् ? **[2]**

(ii) वक्रतुण्ड: कीदृश: अस्ति ? स: किं करोति ? **[2]**

(iii) एक: एव देव: स: सर्वेषां साक्षी भवति ? विवृणुत। **[3]**

(iv) अनन्तनामधेयाय सर्वाकारविधायिने।
समस्तमन्त्रवाच्याय विश्वैकपतये नम:।। भावार्थं लिखत। **[3]**

### परोपकारार्थम् इदं शरीरम्

**Question 9**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधो लिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

मनसा वाचा कर्मणा च परेषाम् उपकार: एव परोपकार: कथ्यते। य: परोपकारं करोति तस्य मानसं पवित्रं विनयोपेतं सरसं च जायते। परोपकारिण: अन्येषां कष्टं स्वकीयं कष्टं मत्वा तन्नाशाय चेष्टन्ते।

(i) वेदव्यासेन किमुक्तम् ? **[2]**

(ii) व्याध: किमर्थं खिन्न: अभवत् ? **[2]**

(iii) दयापूरितेन स्वरेण वृक: लुब्धकं किम् अवदत् ? **[3]**

(iv) वृक: सावधानचित्तेन व्याघ्रं प्रति किम् अवदत् ? **[3]**

## चतुरः रामकृष्णः

**Question 10**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधो लिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

पुरा कर्णाटकराज्ये अनेके प्रसिद्धाः राजानः आसन्। तेषु विजयनगरसाम्राज्यस्य परसिद्धः राजा श्रीकृष्णदेवरायः अनन्यतमः। तस्य राज्यं सुसमृद्धम् आसीत्।

**(i)** रामकृष्णः किमर्थं वनं गतः ? **[2]**

**(ii)** नरभक्षकाः किं कुर्वन्ति स्म ? **[2]**

**(iii)** नायकः रामकृष्णाय किमर्थं गृहं गन्तुम् अनुमतिं दत्तवान् ? **[3]**

**(iv)** नायकः उच्चस्वरेण रामकृष्णं किं प्रत्यवदत् ? **[3]**